IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# ' अथ शब्दानुशासनम् ' – पाणिनेः पतञ्जलेर्वा

**योगेश्वरस्वामी (नव्यव्याकरणाचार्यः, वेदांताचार्यः, नव्यन्यायाचार्यः,विद्यावारिधिः)**

**स्वामिनारायणसंस्कृतविद्याप्रतिष्ठानम्**

**सरधारः – गुजरातम्**

***Abstract*** – अस्मिन् जगतितले सर्वेष्वपि व्यवहारेषु सर्वास्वपि भाषासु शब्दानामावश्यकता भवत्येव । तेषाञ्च शब्दानां निर्माणाय सर्वास्वपि भाषासु पृथक् पृथक् नियमाः भवन्ति । ते नियमाः एव तासां तासां भाषाणां कृते **' व्याकरणम् '** इति नाम्ना अभीधीयते । तत्र संस्कृतभाषायां अनेकानि व्याकरणानि सन्ति, तेष्वपि पाणिनीयं व्याकरणं विराजतेतमाम् । तस्य व्याकरणस्य अपरं नाम **' त्रिमुनिव्याकरणम् '** इति नाम्ना व्यवहारोऽस्ति । तत्रान्यतमः महर्षिः पतञ्जलिः सञ्जातः । तेन विरचिते महाभाष्यनामकग्रन्थे **' अथ शब्दानुशासनम् '** इति प्रथमं वाक्यं वर्तते । तद्वाक्यं पाणिनः पतञ्जलेर्वा इत्यस्मिन् विषये प्राचीनानां नव्यानां च मतभेदो वर्तते । ते सर्वे प्रमाणत्वेन वचनानि ददति । अतः तत्र निष्कर्षः कः? इति अस्मिन् लेखे मया अतिस्फुटतया विचार्यते ।

सुविदितमेतत् समेषां विदुषां यद्व्याकरणं नाम वेदाङ्गस्य प्रधानभूतं मुखाख्यमङ्गमिति लोकेऽपि प्रधानमङ्गं समेषां मुखमेवेति सर्वैरपि सुविदितम् । सर्वेषां सुहृदयानां सुचिन्तकानां सुविदितमस्ति यत् सुसमृद्धसंस्कृतभाषायां विरचितेष्वनेकेषु शास्त्रेषु व्याकरणमन्यतममस्ति । व्याकरणे हि प्रकृतिप्रत्ययादीनां सूक्ष्मातिसूक्ष्मं विवेचनं प्रस्तूयते । विवेचनमेव व्याकरणस्य मुख्योऽर्थः प्रकृतिप्रत्यययोः, ध्वनिस्फोटयोः, शब्दापशब्दयोः, आकृतिद्रव्ययोः, शब्दनित्यत्वानित्यत्वयोः, पदवाक्ययोः, पदपदार्थयोः, वाक्यवाक्यार्थयोर्विवेचनं विश्लेषणञ्च व्याकरणस्य प्रमुखविषयरूपेण विद्यते ।

पुण्यजनकतावच्छेदकशब्दसाधुत्वबोधकः सूत्रात्मको लक्ष्यलक्षणात्मको वा ग्रन्थविशेषः । तदुक्तं महाभाष्ये लक्ष्यलक्षणे व्याकरणम् । लक्ष्यञ्च लक्षणञ्चैतत्समुदितं व्याकरणं भवति । किं पुनर्लक्ष्यं लक्षणञ्च ? शब्दो लक्ष्यः, सूत्रं लक्षणमिति । अथवा पुनरस्तु सूत्रम् इति च । तच्च शब्दसाधुत्वप्रयोजकं व्याकरणशास्त्रमपि बहुविधम् । तथा चोक्तम् –

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।**
**सारस्वतञ्चापिशलं शाकलं पाणिनीयकम् ॥**

यद्यप्यद्यत्वे विविधानि व्याकरणान्युपलभ्यन्ते तथापि नैतेषां वेदाङ्गत्वम् । निखिल-लौकिकालौकिकशब्दानां व्युत्पादकतया पाणिनीयव्याकरणमेव सर्वेषां मूर्धन्यं धन्यं च सद् वेदाङ्गतामाधत्ते ।

महाभाष्यं हि पाणिनीयव्याकरणस्याऽत्यन्तं प्रामाणिकं ग्रन्थरत्नमस्ति । महामुनेः पतञ्जलेराचार्यस्य काले पाणिनीयव्याकरणस्याऽन्येषां प्राचीनानां व्याकरणग्रन्थानाञ्च महती ग्रन्थराशिर्विद्यमानाऽऽसीत् । महामुनिना भगवता पतञ्जलिना पाणिनीयव्याकरणव्याख्यानव्याजेन महाभाष्ये तेषां समस्तानां ग्रन्थानां सारं संगृहीतोऽस्ति । महाभाष्येऽनेकेषां प्राचीनवैयाकरणानामुल्लेखोऽस्ति, अनेकेषाञ्च प्राचीनग्रन्थानामनेकानि वचनानि चोद्धृतानि । सर्वाण्यपि ज्ञातव्यानि विषयजातानि स्थाने-स्थानेऽत्र सपरिकरं विवेचितानि । तस्य महाभाष्यस्य यत् प्रथमं वाक्यम् ' अथ शब्दानुशासनम् ' इति पाणिनेः पतञ्जलेर्वा इति विषये महती चर्चा वर्तते शास्त्रेषु ।

केचन वदन्ति यद् महाभाष्ये सर्वप्रथममिदमेव वाक्यं सूत्रकृतः पाणिनेरेव । तथा चाष्टाध्याया यस्या भाष्यमभाषि भगवता पतञ्जलिना तस्याः सूत्रमिदं प्रथमं पाणिनीयम् । तेषामियमपि युक्तिर्वर्त्तते यद्भाष्यं तु सूत्रमधिकृत्य प्रवर्त्तते । तत्र च योगशास्त्रे पूर्वमीमांसायां वेदान्तशास्त्रे च यानि प्रथमसूत्राण्युपलभ्यन्ते तानि सर्वाण्येव अथशब्दघटितान्येव सन्ति – ' अथ योगानुशासनम् ' , ' अथातो धर्मजिज्ञासा ' , ' अथातो ब्रह्मजिज्ञासा ' इति । तेन न्यायेन महाभाष्ये समुपलब्धमिदं वाक्यम् ' अथ शब्दानुशासनम् ' इति भगवतः पाणिनेरेव सूत्रम्, अथशब्दघटितत्वात् प्राथम्येनोपलम्भाच्च । तेषां मते " वृद्धिरादैच् " इति सूत्रं द्वितीयसूत्रम् । उद्देशवचनं पूर्वं विधेयं तदनन्तरमिति नियमादादैचोरुच्चारणं पूर्वं कर्तव्यं वृद्धिशब्दस्य च पश्चादिति हेतोर्वृद्धिशब्दस्यादौ प्रयोगो मङ्गलार्थ इति महाभाष्यप्रवृत्तिस्तु मध्यमङ्गलत्वेनापि योजयितुं शक्येति तेषां मतम् । तेन कैयटनागेशप्रभृतिभिरस्य ' अथ शब्दानुशासनम् ' इति वाक्यस्य महाभाष्यघटकवाक्यत्वमपास्तं भवति ।

**राजलक्ष्मीटिप्पणकारेणोक्तम्** – ' पदे तु शास्त्रारम्भप्रयोजनसूचकं भगवतः कात्यायनस्य वार्त्तिकमेतत् । भाष्यकारस्यैतद्व्याकरणप्रयोजनप्रदर्शनवाक्यम् इति वदन्तौ कैयटनागेशौ तु भ्रान्तौ एवेत्याहुः। '[1]

पदमञ्जरीकारहरदत्त-प्रदीपकारकैयट-उद्योतकारनागेश-शब्दकौस्तुभकारभट्टोजिदीक्षित- सर्वदर्शनसंग्रहकारमाध्वाचार्यप्रभृतयः प्राचीनाः ' अथ शब्दानुशासनम् ' इति सूत्रं भाष्यकारस्यैवाहुः। यथा –

**पदमञ्जरीकारहरदत्त** – वृत्तिकारस्तु प्रयोजनप्रवणत्वात् प्रेक्षावत्प्रवृत्तेः सम्भवाच्च प्रयोजनस्य भाष्यकारेण पठितं साक्षात्प्रयोजनमाह – अथ शब्दानुशासनम् इति ।

**प्रदीपकारकैयटः** – ' भाष्यकारो विवरणकारत्वाद् व्याकरणस्य साक्षात्प्रयोजनं प्राह – अथ शब्दानुशासनमिति ' इति प्राह ।

**उद्योतकारनागेश** – भगवान् विवरणकारत्वान्मन्दाधिकारिणां प्रवृत्तेः प्ररोचकप्रयोजनप्रतिपत्तिप्रवणत्वाद् व्यवहितेषु स्वर्गापूर्वादिष्वनाश्वासात् साक्षात्प्रयोजनं शब्दव्युत्पत्तिलक्षणं वदति ।

**नवीनो भट्टोजिदीक्षितोऽपि स्वशब्दकौस्तुभे प्राह** – ' व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयत् ' अथ शब्दानुशासनम् ' इति ।

**सर्वदर्शनसंग्रहकारमाध्वाचार्यः** – ' नन्वयं प्रकृतिभागोऽयं प्रत्ययभागः ' इति प्रकृतिप्रत्ययविभागः कथमवगम्यते इति चेत् पीतपातञ्जलानामेतच्चोद्यं चमत्कारं न करोति, व्याकरणशास्त्रस्य प्रकृतिप्रत्ययप्रतिपादनपरतायाः प्रसिद्धत्वात् । तथा हि पतञ्जलेर्भगवतो महाभाष्यकारस्येदमादिमं वाक्यं – ' अथ शब्दानुशासनम् ' इति[2] ।

तदेतत् सर्वमलीकं प्रमाणाऽभावात् । प्राचीन सूत्रग्रन्थानां रचनाशैल्याः, अनुसारेणेदं सूत्रं पाणिनीयमेव प्रतीयते । महर्षि पतञ्जलिरिदं सूत्रं व्याचक्षाणः प्राह –

' अथेति शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ' ।

अस्मिन्वाक्ये ' प्रयुज्यते ' क्रियायाः कर्ता यदि पाणिनिर्मन्येत तदास्योत्तरवाक्येन संगतिर्जायते । अन्यथा ' प्रयुज्यते ' क्रियायाः कर्ता पतञ्जलिर्भविष्यति ' अधिकृतम् ' इत्यस्य कर्ता पाणिनिः । यतो हि शास्त्रस्य रचयिता पाणिनिरेवास्ति । विभिन्नकर्तृ स्वीकारेऽत्रैकवाक्यत्वं न घटते ।

अत्रान्यानि च प्राचीनानि प्रमाणान्यस्य सूत्रस्य पाणिनीयत्वे समुदाह्रियन्ते । तथाहि –

1. मूलपाणिनीयाष्टकस्य बहुषु प्राचीनहस्तलेखेषु प्रारम्भः ' अथ शब्दानुशासनम् ' इति सूत्रेण भवति ।

2. पाणिनीयाष्टकवृत्तिग्रन्थकाशिकायामन्यसूत्रवदस्य व्याख्यानं कृतम् । ' अथ शब्दानुशासनम् – केषां शब्दानां ? लौकिकानां वैदिकानाञ्च........... '

3. पाणिनीयाष्टकस्य वृत्ते भाषावृत्ते व्याख्याता सृष्टिधराचार्यः प्रोवाच – ' व्याकरण-शास्त्रमारभमाणो भगवान् पाणिनिमुनिः प्रयोजननामनी व्याचिख्यासुः प्रतिजानीते – ' अथ शब्दानुशासनमिति । '

4. मनुस्मृतेर्व्याख्याता मेधातिथिः प्रोवाच – ' पौरुषेयेष्वपि ग्रन्थेषु नैव सर्वेषु प्रयोजनाऽभिधानमाद्रियते । तथाहि – भगवान् पाणिनिरनुक्त्वैव प्रयोजनम् ' अथ शब्दानुशासनम् ' इति सूत्र सन्दर्भमारभते । '

5. काशिकाव्याख्याता न्यासकारो जिनेन्द्रबुद्धिः प्रोवाच – ' शब्दानुशासनप्रस्तावादेव हि शब्दस्येति सिद्धे शब्दग्रहणं यत्र शब्दपरो निर्देशस्तत्र स्वं रूपं गृह्यते नार्थपरनिर्देश इति ज्ञापनार्थम् । ' – न्यास – ( 3-4-26 )

6. महर्षिदयानन्दसरस्वती पाणिन्यष्टकव्याख्याने प्राह – ' इदं सूत्रं पाणिनीयमेव प्राचीनलिखित- पुस्तकेष्वादाविदमेवास्ति । दृश्यन्ते च सर्वेष्वार्षेषु ग्रन्थेष्वादौ प्रतिज्ञासूत्राणीदृशानि । '

एभिः पुष्टैः प्रमाणैः ' अथ शब्दानुशासनम् ' इति सूत्रं पाणिनिनैव कृतम् न पतञ्जलिना नाप्यन्येन केनचित् । शब्दानुशासनमिति पाणिनिव्याकरणस्य प्राचीनं नामास्ति । ' अथ योगानुशासनम् ' इति सूत्रम् यदि योगशास्त्रस्यास्ति चेत् ' अथ शब्दानुशासनम् ' पाणिनिव्याकरणशास्त्रस्य कृतो न स्यात् । महाभाष्यकारोऽप्याह तत्रैव – ' शब्दानुशासनं नाम शास्त्रम् । '

अत्र ' नाम ' शब्देन पाणिन्यष्टकस्य ' शब्दानुशासनम् ' नामान्तरमस्तीति विज्ञेयम् । व्याकरणस्येदमन्वर्थन्नाम शब्दानुशासनमिति ।

अस्मिन् विषये ' महाभाष्यनिगूढाकूतयः ' इति नामकग्रन्थस्य लेखको महावैयाकरणो देवस्वरूपमिश्रः ' अथ शब्दानुशासनम् ' इदं वचनं पाणिनेरिति स्वीकृतानां प्राचीनार्वाचीनवादीनां युक्तीः स्वतर्कैः निराकृत्य ' अथ शब्दानुशासनम् ' इदं वचनं भाष्यकारस्यैवेति कैयटनागेशप्रभृतीनां विदुषां प्राचीनानां साम्प्रतिकानाञ्च भाष्यतत्त्वविदामपि मतानि सविस्तरं समुद्धृत्यसुप्रबलतरतर्कैः सुदृढतराभिश्च युक्तिभिः सिद्धान्तरूपेण समीचीनं मतं स्थापयति स्म । तथाहि स आह – अथ व्याकरणमहाभाष्यस्य संशयविषयीभूतानां गूढस्थलानां यथासम्प्रदायं यथासन्दर्भमनुदक्षरञ्च व्याख्यानं प्रारभ्यते ।

---

[1] महाभाष्यनवाह्निकालोचनम् ( पृ – 15 )

[2] सर्वदर्शनसङ्ग्रहे व्याकरणदर्शनप्रकरणे

तत्र व्याकरणशास्त्रस्य परमप्रमाणभूते महर्षिपतञ्जलिनिर्मिते महाभाष्ये सर्वप्रथमम् – ' अथ शब्दानुशासनम् ' इति वचनमुपलभ्यते । अस्य वचनस्य कृते पक्षद्वयं दरीदृश्यते । तथाहि – केचिद् वदन्ति यद् महाभाष्यकारस्य वचनमिदमिति । अपरे प्राहुर्यन्नेदं महाभाष्यकारस्य वचनम्, प्रत्युत भगवतः पाणिनेः सूत्रकारस्यैवेदं प्रथमं सूत्रमिति । तत्राद्यपक्षे कैयटादयो विद्वांसो महाभाष्यव्याख्यारः सम्मताः । कैयटव्याख्याने प्रदीपे नागेशकृते उद्द्योते च स्पष्टमेव तथा प्रतिपादितम् । समीचीनमेव तत्, यतो ह्यनुवाद्यमनुक्त्वा हि न विधेयमुदीरयेदिति नियममनुसृत्य पूर्वमुद्दिश्यकथनं तदनु विधेयकथनमित्यस्त्याचार्यस्य शैली । यथा " इको यणचि ", " अकः सवर्णे दीर्घः " इत्यादि ।

तथैव संज्ञासूत्रेष्वपि " अदेङ् गुणः " इत्यादिषु पूर्वमुद्देश्यकथनं तदनु विधेयकथनमित्येव रीतिर्दृश्यते । तयैव च रीत्या संज्ञा-संज्ञिभावो निर्णेतव्य इति भाष्यकृता सिद्धान्तितम् । तत्रेयं शङ्का " वृद्धिरादैच् " इति सूत्रे कथं " वृद्धिरादैच् " इति ? अत्र पूर्वम् विधेयनिर्देशः कथमिति प्रश्नस्याशयः । तत्रोत्तरयति भाष्यकृत् –

' एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । ' माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्ति, आयुष्मत्पुरुषकाणि च अध्येतारश्च वृद्धियुक्त यथा भवेयुरिति '[3] इति

एतस्य भाष्यस्य तुलनायां यानि ' अथ शब्दानुशासनम् ' इति वाक्यस्य सूत्रत्वसाधकानि प्रमाणान्युपन्यस्यन्ते तान्यतिदुर्बलानि । ब्रह्मयज्ञे च शिष्टा आदिसूत्रत्वेन " वृद्धिरादैच् " इत्येव परम्परया पठन्ति । तदेतदपि मुख्यं प्रमाणं ज्ञातव्यम् ।

तथैव ' सिद्धे शब्दार्थसम्बन्धे ' इति वार्तिके सिद्धशब्दोऽपि मङ्गलरूपतया भाष्यकृता व्याख्यातः । तस्मात् ' रक्षोहागमलघ्वसन्देहाः प्रयोजनम् ' इत्येतदादिमं वार्तिकं ये मन्यन्ते तेऽपि भ्रान्ता एव प्रतीयन्ते । किञ्च " वृद्धिरादैच् " इति वृद्धिपदेन सूत्रकृतो मङ्गलम् ' सिद्धे शब्दार्थसम्बन्धे ' इति सिद्धपदेन च वार्तिककृतो मङ्गलमिति व्याचक्षाणः भगवांश्छ्रीपतञ्जलिः स्वयं महाभाष्यस्यारम्भे मङ्गलं न कुर्यादिति नैतदुपपद्यते ।

तस्मात् ' अथ शब्दानुशासनम् ' इत्यथशब्देन तेन भाष्यकारेण मङ्गलं कृतमित्येव सम्यगाभाति । एतद्भाष्यदर्शनेनेदमेव निश्चीयते यद् " वृद्धिरादैच् " इत्येव भगवतः पाणिनेरष्टाध्याय्याः प्रथमं सूत्रम्, न तु ' अथ शब्दानुशासनम् ' इति । इदं तु महाभाष्यकारस्य प्रथमं वाक्यम् । व्याख्यातं च प्रधानव्याख्यात्रा कैयटेन भाष्याकारो विवरणकारत्वाद् व्याकरणस्य साक्षात् प्रयोजनमाह - अथ शब्दानुशानमिति । प्रयोजनप्रयोजनानि तु रक्षोहादीति पश्चाद् वच्यन्ते इति । एतेनोभयमपि भाष्यकारवाक्यमिति कैयटमतं स्फुटीभवति । यादृशी च भाष्यकारस्य शैली यद् वार्तिकमुल्लिख्य तदनु तद्वाक्यानुवादेन ' कर्तव्यः ', ' वक्तव्यम् ' इत्यादि वदति तथा ' रक्षोहागमलघ्वसंदेहाः ' इत्यत्र न दृश्यते इत्येतदपि तस्य वार्तिकत्वाभावे बीजम् ।

अथशब्दस्य मङ्गलत्वन्तु –

**ऊँकारश्चाथशब्दश्च द्वावेतौब्रह्मणः पुरा ।**
**कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥**

तदुक्तं शङ्कराचार्यैः ' अथान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति ' इति ।

नागेशोऽपि प्रोक्तवानुद्योते – ' प्रारम्भक्रियाविषयत्वद्योतकस्यापि अथशब्दस्यान्यार्थं नीयमानदध्यादिवन्मङ्गलत्वमपीत्युभयार्थमथशब्दः प्रयुज्यत इति फलितम् '[4] ।

यद्यपि ' अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ' इति भाष्यव्याख्यानादापाततो भाति, यदिदम् ' अथ शब्दानुशासनम् ' इति वाक्यं सूत्ररूपमेव, अत एव महाभाष्यकारेण व्याख्यातमिति, तथापि भाष्यकारवचनमेवेदम्, यतो हि भाष्यस्थवचनस्यापि भाष्ये व्याख्येयत्वेऽपि भाष्यस्थत्वमेव, न तु तद्भिन्नत्वम् । अत एवोक्तम् –

**सूत्रस्थं पदमादाय वाक्यैः सूत्रानुसारिभिः ।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥** इति ।

अत एव कैयटो वाक्यव्याख्याने – ' भाष्यकारो विवरणकारत्वाद् व्याकरणस्य साक्षात्प्रयोजनं प्राह – अथ शब्दानुशासनमिति ' इति प्राह ।

महावैयाकरणेन श्रीनागेशेनापि स्पष्टमुक्तमेव – भगवान् विवरणकारत्वान्मन्दाधिकारिणां प्रवृत्तेः प्ररोचकप्रयोजनप्रतिपत्तिप्रवणत्वात् व्यवहितेषु स्वर्गापूर्वादिष्वनाश्वासात् साक्षात्प्रयोजनं शब्दव्युत्पत्ति-लक्षणं वदति ।

महाभाष्यकारो भगवान् पतञ्जलिर्महाभाष्यरचनावसरे प्रथमतो वचनमिदमत एवोट्टङ्कितवान्, यतो हि प्रतिदिनं यावन्तमंशं तेन छात्राः पाठिताः स एवाह्निकशब्देन प्रतिनिर्दिष्टः, अह्ना निर्वृत्तमाह्निकमिति व्युत्पत्तेः । " तेन निर्वृत्तम् "[5] इत्यनेन सूत्रेण ठक् । पाठने च शिष्याः सावधाना भवेयुरिति कृत्वा सफलप्रस्तावनार्थं मङ्गलार्थञ्चेदं वाक्यं प्रथमत उपात्तम् ।

अत एव ब्रह्मसूत्रभाष्य-व्याख्यानभामतीव्याख्याने कल्पतरुपरिमलकारः ' मङ्गलश्लोके शास्त्रीयविषयप्रयोजनप्रदर्शनेन तथाभूते ब्रह्मणि भाष्यस्य तात्पर्यमिति कृत्स्नं भाष्यं सामान्यतो व्याख्यातम् । इदानीं प्रतिग्रन्थं व्याख्यानं प्रारभ्यते इत्येतदर्थोऽथशब्द इत्यर्थः । यद्यपि प्राभ्यत इत्यनुक्तेऽपि

[3] महाभाष्यम् – ( 1-1-1 )

[4] महाभाष्यम् – उद्द्योतः – अथशब्दानुशासनम्

[5] अष्टाध्यायी – ( 4-2-68 )

प्रारम्भादेवेदं प्रारभ्यत इत्यवगन्तुं शक्यम्, तथापि श्रोतॄणां श्रद्धेयत्वप्रतिपत्त्यर्थं तदुक्तिः । दृश्यते हि तदर्थमेव लोकेऽप्याप्ताः किञ्चिदहं वक्ष्यामीत्युक्त्वा हितमुद्दिशन्ति ' इति ।

अतोऽत्रायं निष्कर्षः – साधुशब्दज्ञानरूपमुख्यप्रयोजनप्रदर्शनार्थं शिष्याणां सावधानीकरणार्थं मङ्गलार्थञ्च भगवान् भाष्यकारः पतञ्जलिः प्रयुक्तवान् वाक्यमिदम् – ' अथ शब्दानुशासनम् ' इति ।

तत्र केचिद् वदन्ति यदिदम् ' अथ शब्दानुशासनम् ' इति वाक्यं न महाभाष्यकारस्य पतञ्जलेः, प्रत्युत पाणिनेरेवेदं प्रथमं सूत्रमिति । तथा च प्राह महर्षिः स्वामी श्रीदयानन्दः ' अष्टाध्यायी-महाभाष्यम् ' इति नामके ग्रन्थे ' अथ शब्दानुशासनम् ' इति वाक्यविषये –

' इदं सूत्रं पाणिनीयमेव । प्राचीनलिखितपुस्तकेषु आदाविदमेवास्ति । दृश्यन्ते च सर्वेष्वार्षेषु ग्रन्थेषु प्रतिज्ञासूत्राणीदृशानि ' इति ।

तत्र टिप्पण्याञ्च ' अत्र मेधातिथिर्भृगुप्रोक्तसंहिताः प्रथमश्लोकव्याख्याने एनमेवार्थमादिशत् । पौरुषेयेष्वपि ग्रन्थेषु नैव सर्वेषु प्रयोजनमभिधानमाद्रियते । तथाहि भगवान् पाणिनिरनुक्त्वैव प्रयोजनम् ' अथ शब्दानुशासनम् ' इति सूत्रसन्दर्भमारभते ' इति ।

' अथ शब्दानुशासनम् ' इति वचनं भगवतो महाभाष्यकारस्य पतञ्जलेरिति प्रतिपादयन्तो महाभाष्यव्याख्याकाराः कैयटनागेशप्रभृतयो महान्तो विद्वांसोऽपि भ्रान्ता हेयवचना इति तेषां समुद्घोषः ।

अन्येऽपि महर्षिदयानन्दप्रणीतस्याष्टाध्यायीमहाभाष्यग्रन्थस्य व्याख्याकाराः – ' अथ शब्दानुशासनम् ' इति वचनं भगवतः पाणिनेरेवेति, न तु महाभाष्यकारस्य पतञ्जलेरिति पक्षं कक्षीकुर्वाणाः प्राहुर्यद् यथा ' अथ योगानुशासनम् ' इत्यपि महर्षिप्रणीतमाद्यं सूत्रम्, तथैव पाणिनेरेवेदम् ' अथ शब्दानुशासनम् ' सूत्रम्, न भाष्यवचनमिति ।

तेषामयमाशयः – सर्वत्र सूत्रकाराणां शैलीयं दृश्यते यदादौ तथैव सूत्राणि प्रणीतवन्तः । यथा –

**योगशास्त्रे –** अथ योगानुशासनम् ।

**मीमांसायाम् –** अथातो धर्मजिज्ञासा ।

**वेदान्ते –** अथातो ब्रह्मजिज्ञासा ।

**वैशेषिकदर्शने –** अथाऽतो धर्मं व्याख्यास्यामः ।

**निदानसूत्रे –** अथातश्छन्दसां नियचं व्याख्यास्यामः ।

**चरके –** अथातो दीर्घञ्जीवितीयमध्यायं व्याख्यास्यामः ।

**सुश्रुते –** अथातो वेदोत्पत्तिनामाध्यायं व्याख्यास्यामः

**पारस्करगृह्यसूत्रे –** अथातो गृहस्थालीपाकानां कर्म ।

**खदिरगृह्यसूत्रे –** अथातो गृह्यकर्माणि ।

**गोभिलीयगृह्यसूत्रे –** अथातो गृह्यकर्माण्युपदेक्ष्यामः ।

एवञ्च महर्षिपतञ्जलिप्रणीतयोगशास्त्रे, महर्षिजैमिनिप्रणीतपूर्वमीमांसाख्ये, महति पूजनीये शास्त्रे कृष्णद्वैपायनव्यासप्रणीते वेदान्तशास्त्रे च यदा प्रथममेतादृशं सूत्रं दरीदृश्यते, तर्हि सर्वशास्त्रोपकारके व्याकरणशास्त्रे सूत्रत्वात् तथैव भाव्यमिति हेतोरिदम् ' अथ शब्दानुशासनम् ' इति वाक्यं पाणिनेरेवादिमं सूत्रम्, न तु व्याख्याकृतो महाभाष्यकारस्येति प्रतिपादयन्ति ।

तत्सर्वमविचारितरमणीयमिति । तत्र नहि प्रतिज्ञामात्रेण वस्तुसिद्धिः, किन्तु हेतुप्रतिपादनादिति हेतोरहं यथाशक्ति यथामति यथौचित्यञ्च प्रतिपादये । तथाहि – महर्षिणा दयानन्देन प्राचीनपुस्तकेषु पाठोऽस्य सर्वप्रथममुपलभ्यते इत्यनेन हेतुना वाक्यस्यास्य ' अथ शब्दानुशासनम् ' इत्यस्य भगवतः पाणिनेरादिसूत्रत्वे हेतुर्न भवितुमर्हति, यतो हि भ्रमात् प्रमादादविचारात् प्रथमत्वेनोपादानं तस्यादिसूत्रत्वे साधकं भवितुं नार्हति, युक्त्या तस्य बाधेऽकिञ्चित्करत्वात् । तथा चोक्तं गदाधरभट्टाचार्यैः –

**' नहि कस्यचिद् ग्रन्थकृतो विपरीतलेखनं युक्तिबलाद् वस्तुसिद्धौ बाधकम् '** इति ।

किञ्च, भ्रमप्रमादकरणबाधादिदोषा मनुष्यस्य स्वाभाविकाः । अतः केनापि कदाचिद् भ्रमेण विपरीतं वक्तुं लिखितुं वा शक्यते । नहि तेन विपरीतेन वचनेन किञ्चित् प्रामाणिकं वस्तु साधयितुं शक्यते । अत एवोक्तमभियुक्तैः –

**प्राचीनमित्येव न साधु सर्वं न नव्यमित्येव भवत्यवद्यम् ।**
**सन्तः परीक्षान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥**[6] इति ।

[6] मालविकाग्निमित्रम् – ( 1-2 )

अपरञ्च – प्राचीनपुस्तकान्तर्गतानि महाभाष्यव्याख्याकारैः कैयटनागेशप्रभृतिभिर्विद्वद्भिः प्रणीतानि टीकारूपाणि पुस्तकान्यपि वर्तन्ते, तानि तु प्रमाणरूपाणि वचनानि ‘ अथ शब्दानुशासनम् ’ इति वचनं भाष्यकारस्येति प्रतिपादयन्ति । तानि कथं नास्य भाष्यकारीयवचनत्वे मान्यानीति पृष्टो भवान् व्याचष्टाम् ।

या चेयं युक्तिरपरा महर्षिदयानन्दस्वामिभिः प्रोक्ता यद् ‘ दृश्यन्ते च सर्वेष्वार्षेषु ग्रन्थेषु प्रतिज्ञासूत्राणीदृशानि ’ इति । सापि न वस्तुसाधिका, यतोहि येऽप्यृषयः प्रतिज्ञारूपेणेदृशानि सूत्राणि प्रणीतवन्तस्तेषां महर्षीणां पद्धतिर्न विस्मर्तव्या । ते हि प्रतिज्ञासूत्रेण प्रतिज्ञातं वस्तु प्रतिज्ञासूत्रानन्तरमेव ( वचनानन्तरं वा ) लक्षणवचनेन सूत्ररूपेण वान्यरूपेण वा लक्षितवन्तः । यथा – “ अथ योगानुशासनम् ”[7] इति सूत्रेण योगं प्रतिज्ञाय भगवान् पतञ्जलिस्तदनन्तरसूत्रेणैव योगस्य लक्षणं कृतवान् – “ योगश्चित्तवृत्तिनिरोधः ”[8] इति ।

एवमेव पूर्वमीमांसायाम् – “ अथातो धर्मजिज्ञासा ”[9] इति सूत्रेण महर्षिर्जैमिनिर्धर्मं प्रतिज्ञाय तदनन्तरसूत्रेणैव धर्मस्य लक्षणं प्राह – “ चोदना लक्षणोऽर्थो धर्मः ”[10] इति सूत्रेण । वेदान्तसूत्रेऽपि “ अथातो ब्रह्मजिज्ञासा ”[11] इति सूत्रेण जिज्ञास्यं ब्रह्म प्रतिज्ञाय भगवान् व्यासो ब्रह्मसूत्रे तदनन्तरमेव ब्रह्मणो लक्षणमाह द्वितीयेन सूत्रेण – “ जन्माद्यस्य यतः ”[12] इत्यनेन । ते हि सर्वे महर्षयः, मान्याः सूत्रकाराः प्रतिज्ञासूत्रेणैव लक्षणात्मकेन लक्षितवन्तः । इमां सूत्रकारीयपद्धतिमवेक्ष्य प्रकृतेऽपि विचार्यते ।

यदि ‘ अथ शब्दानुशासनम् ’ इति वचनं भगवतः पाणिनेः स्यात्, तदावश्यं भगवता तदनन्तरसूत्रेण द्वितीयेन अनुशासनकर्मत्वेन प्रतिज्ञातस्य शब्दस्य लक्षणं लक्षितं स्यात् । एवञ्च येषां महर्षिदयानन्दतदनुयायिवर्गाणामपरेषाञ्च केषाञ्चिन्मतेन यदि ‘ अथ शब्दानुशासनम् ’ इति वचनं भगवतः पाणिनेरेवादिमं सूत्रमिति पक्षो वर्त्तते, तदा द्वितीयं सूत्रं स्यात् “ वृद्धिरादैच् ” इति । किन्तु नात्र भगवान् पाणिनिः प्रतिज्ञातस्य शब्दस्य लक्षणं कृतवानिति सूत्रकारीयपद्धतिहानप्रसङ्गः । सूत्रकाराणां च तथैव शैली विद्यते यत्ते प्रतिज्ञातवस्तुनो लक्षणं प्रतिज्ञासूत्रानन्तरमेव चक्रुः । यदा च वचनमिदं भाष्यकारस्येति पक्षः समाश्रीयते, तदा न कापि क्षतिः ।

यतो हि सूत्रकारेण स्वन्तत्रेच्छस्य मुनेर्नियन्तुमशक्यत्वेनेति नियमात् शब्दविषयिणी प्रतिज्ञैव न कृता । अतो न तेन महर्षिणा शब्दस्वरूपं वक्तव्यम् । यदा चेदमङ्गीक्रियते यदिदं वाक्यम् – ‘ अथ शब्दानुशासनम् ’[13] इति महाभाष्यकारस्य पतञ्जलेः पाणिनिसूत्रव्याख्याकारस्यादिमं वाक्यम्, तदा तेन प्रतिज्ञातस्य शब्दस्य स्वरूपं वक्तव्यम् । तच्च प्रोक्तमेव तेन महर्षिणा पातञ्जलव्याकरणमहाभाष्ये – ‘ येनोच्चारितेन सास्नालाङ्गूलककुद-खुरविषाणिनां संप्रत्ययो भवति स शब्दः ’[14] इत्यनेन प्रथमेन स्फोटरूपशब्दस्वरूपपरिचायकेन वचनेन । ततश्च – अथवा ‘ प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते ’[15] इति द्वितीयेन ध्वनिरूपशब्द-परिलक्षकेण लक्षणवचनेन ।

एवञ्चात्रेदमाकूतं यद् भगवतः पाणिनेस्तु प्रथमं सूत्रम् “ वृद्धिरादैच् ”[16] इत्येव, ‘ अथ शब्दानुशासनम् ’ इति वचनं तु भगवतो महाभाष्यकारस्य पतञ्जलेरेव । तथा स्वीकारे नियमे बाधाभावात् । पाणिनिसूत्रत्वे तु सर्वथैव सूत्रकारीयपद्धतिहानप्रसङ्गात् । अतोऽत्र ‘ बुद्धेः सत्पक्षपाततः ’ इत्युक्तेरनुसारेण वच्मि यद् दुराग्रहं विहाय ‘ बालादपि सुभाषितं ग्राह्यम् ’ इति प्रमाणाद् यथाबुद्धि सप्रमाणमुपपादितं पक्षं यत् ‘ अथ शब्दानुशासनम् ’ इति वचनं भगवतो महाभाष्यकारस्यैव, न तु पाणिनेरिति स्वीकृत्य निष्पक्षपातं पन्थानं प्रशस्तं कुर्वन्तु धीधनाः ।

व्याकरणसिद्धान्तसुधानिधिकारो निःसंशयेन पक्षमिमं स्वीकुर्वन्नाह – तत्र प्रवृत्तिं प्रति स्वविषय-विशेष्यकस्येष्टसाधनताज्ञानस्य हेतुत्वात् साधुशब्दज्ञाने वक्ष्यमाणेष्टसाधनत्वज्ञानवतां पुंसां शब्द-ज्ञानोपायाकाङ्क्षायां व्याकरणस्य शब्दज्ञानोपायत्वप्रदर्शनपरं भाष्यमवतरति – ‘ अथ शब्दानुशासनमिति ’

इममेव पक्षं महान् विद्वान् माध्वाचार्यः सर्वदर्शनसंग्रहे स्वीकृतवान् । तथा हि – ‘ नन्वयं प्रकृतिभागोऽयं प्रत्ययभागः ’ इति प्रकृतिप्रत्ययविभागः कथमवगम्यते इति चेत् पीतपातञ्जलानाम् एतच्चोद्यं चमत्कारं न करोति, व्याकरणशास्त्रस्य प्रकृतिप्रत्ययप्रतिपादनपरतायाः प्रसिद्धत्वात् । तथा हि पतञ्जलेर्भगवतो महाभाष्यकारस्येदमादिमं वाक्यं – ‘ अथ शब्दानुशासनम् ’ ( म.भा. पस्पशा. 1-1-1 ) इति[17] । अस्य वाक्यस्य कश्चन विलक्षणोऽर्थः कृतो माध्वाचार्येण स प्रदर्श्यते प्रसङ्गात् ।

---

[7] योगसूत्रम् – ( 1-1-1 )
[8] योगसूत्रम् – ( 1-1-2 )
[9] मीमांसासूत्रम् – ( 1-1-1 )
[10] मीमांसासूत्रम् – ( 1-1-2 )
[11] ब्रह्मसूत्रम् – ( 1-1-1 )
[12] ब्रह्मसूत्रम् – ( 1-1-2 )
[13] महाभाष्यम्
[14] महाभाष्यम् – पस्पशा.
[15] महाभाष्यम् – पस्पशा.
[16] अष्टाध्यायी – ( 1-1-1 )
[17] सर्वदर्शनसङ्ग्रहे व्याकरणदर्शनप्रकरणे

अस्यार्थः – अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। अधिकारः प्रस्तावः, प्रारम्भः इति यावत्। शब्दानुशासनशब्देन च पाणिनिप्रणीतं व्याकरणशास्त्रं विवक्ष्यते । शब्दानुशासनमित्येतावदभिधीयमाने सन्देहः स्यात्, किं शब्दानुशासनं प्रस्तूयते न वेत्ति । तथा मा प्रयाङ्क्षीदित्यथशब्दं प्रायुङ्क्त । अथशब्दप्रयोगबलेनार्थान्तरव्युदासेन प्रस्तूयत इत्यस्यार्थस्याभिधीयमानत्वात् । अनेन हि वैदिकाः शब्दाः ‘ गौरश्वः पुरुषो हस्ती शकुनिः ’ इत्यादयश्चानुशिष्यन्ते। व्युत्पाद्य संस्क्रियन्ते प्रकृतिप्रत्यय-विभागवत्त्या बोध्यन्त इति शब्दानुशासनम्।

अत्रेदमवधेयम् – नहि केवलं ‘ अथातो धर्मजिज्ञासा ’, ‘ अथातो ब्रह्मजिज्ञासा ’, ‘ अथ योगानुशासनम् ’ इति पूर्वोत्तरमीमांसायोगदर्शनसूत्रदर्शनमात्रेण तथैव सूत्रकाराणां शैलीति कल्पयितुं शक्यते। यतो हि महान् प्रमाणज्ञो भगवान् महर्षिः श्रीगौतमः प्रथमतो विनैवाथशब्दं सूत्रं प्रणिनाय। तथाहि –

‘प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजात-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ’[18] इति।

अपि च यदीदं वाक्यम् ‘ अथ शब्दानुशासनम् ’ इति पाणिनिसूत्रं स्यात्, तर्हि महाभाष्यकारः पाणिनिसूत्रं व्याख्यानप्रकरणे एवास्यापि व्याख्यानं कुर्यात्। तथा तु न कृतमित्याद्यव्यतिरेक-निश्चयस्यापत्तिं प्रति प्रयोजकत्वादत्रेयमापत्तिरेवास्य वचनस्य भाष्यकारीयत्वसाधिका। महाभाष्ये तृतीयाह्निकत आरभ्य एव पाणिनिसूत्राणां विवरणं कृतम् । प्रथमाह्निके पस्पशाभिधे तु महाभाष्यकारः शब्दस्य स्वरूपम्, व्याकरणस्य प्रयोजनं व्याकरणस्य स्वरूपादिकञ्च निर्दधार। द्वितीयाह्निके च माहेश्वरसूत्राणां व्याख्यानं फलमवसरप्राप्तविषयान्तरविवेचनञ्च कृतम्। यदि चेत् ‘ अथ शब्दानुशासनम् ’ इति वाक्यं पाणिनीयं सूत्रमेव स्यात्, तर्हि तद्व्याख्यानान्तरं झटित्येव द्वितीयस्य पाणिनीयसूत्रस्यैव भाष्यं कृतं स्याद्। तथा तु न कृतम्, अपि तु चतुर्दशसूत्राणां विवेचनं कृतमिति दृश्यते। यदि च ‘ अथ शब्दानुशासनम् ’ इति वाक्यं पाणिनिसूत्रं स्यात्, तर्हि महाभाष्यकारस्तत्सूत्रव्याख्यानं पाणिनिसूत्र-व्याख्यासन्दर्भे कुर्यात्, किन्तु तथा तु न कृतम्।

यतो हि पाणिनिसूत्रव्याख्यानं तृतीयाह्निकतः प्रारब्धम्। मध्ये द्वितीयाह्निके माहेश्वरसूत्राणां व्याख्या कृता। अस्य वचनस्य महाभाष्यकारीयत्वे तु न किमप्यनुपपन्नम्, यतो हि प्रथमाह्निके महाभाष्यकारो भूमिकारूपेण व्याकरणशास्त्रप्रयोजनभूतस्य शब्दसाधुत्वस्योद्देश्यभूतः शब्दः किं स्वरूपः ? तन्निष्ठसाधुत्वनिर्धारकं व्याकरणञ्च किमिति ? शब्दसाधुत्वं शब्दं वा निर्माति व्याकरणशास्त्रम्, उताहो ज्ञापयतीत्यादिगूढविषयान् विमृष्टवान् । द्वितीयाह्निकतस्तु सूत्राणां व्याख्यानं प्रारब्धम्। न्यायभाष्येऽपिभाष्यकारो वात्स्यानः प्रथमतः कतिभिर्वाक्यैरवतरणं विधायैव सूत्रव्याख्यानमारब्धवान्। तथाहि –

‘ प्रमाणतोऽर्थप्रतिपत्तो प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्। प्रमाणमन्तरेण नार्थप्रतिपत्तिः, नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्। प्रमाणेन खल्वयं ज्ञातार्थमुपलभ्य तमर्थमभीप्सति, जिहासति वा । तस्येहाजिहासाप्रयुक्तस्य समीहाप्रवृत्तिरित्युच्यते । सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः । समीहमानस्तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वा। अर्थस्तु सुखं सुखहेतुश्च। सोऽयं प्रमाणार्थोऽपरिसंख्येयः, प्राणभृद्भेदस्यापरिसंख्येयत्वात् ’[19]। इत्यादि।

वेदान्तशास्त्रेऽपि ब्रह्मसूत्रभाष्यव्याख्यानावसरे आद्यशङ्कराचार्यो ब्रह्मसूत्राणां व्याख्यानतः प्राग् भूमिकारूपेण विषयावताररूपं स्ववाक्यं सारगर्भितं समायोजितवान्।

तथैव न्यायभाष्येऽपि षोडशपदार्थेषु प्रमाणप्रमेयादिषु प्रथमतः प्रमाणमेकं वस्तु किमर्थं गृहीतम्, यतो हि प्रमाणमन्तरेणापि सर्वाः प्रवृत्तयो भविष्यन्त्येव। नहि केवलं प्रमाणज्ञा एव प्रवर्तन्ते सफला वा भवन्ति, किन्तु सर्वथैवाज्ञा अपि प्रमाणप्रमेयप्रभृतिपदार्थानविजान्त एव प्रवर्तन्ते लभन्ते च स्वाभीप्सितम्। अत एव ‘ पशुभिश्चाविशेषात् ’ इति वचनं प्रमाण्यं बिभर्ति, अतः किमर्थं प्रमाणमभ्युपेयमिति प्रश्नस्य निवर्तनाय वात्स्यायनभाष्येऽन्यत्र चावतरणं भूमिकारूपं प्रवृत्तम्।

तथैव प्रकृतेऽपि व्याकरणमहाभाष्ये पूर्वदर्शिताः प्रश्नाः स्वभावतो जायमानाः समाधेया एव महाभाष्यकृता इति तत्समाधानाय प्रवृत्तेन महर्षिणा भगवता पतञ्जलिना ‘ अथ शब्दानुशासनम् ’ इति वचनेनानुषङ्गिकमङ्गलप्रयोजनकेनारम्भार्थाभिधायिना चाथशब्देन घटितेन भाष्यमारब्धवान्। नहि केवलमन्यशब्दं दृष्ट्वा सूत्ररूपतैवेति निर्णयोऽनाग्रहग्रहं जनयति । ब्रह्मसूत्रशाङ्करभाष्यव्याख्यानभूतायां श्रीवाचस्पतिमिश्रप्रणीतायां भामत्यामपि प्रथमस्य वचनस्य मङ्गलानन्तरं प्रवृत्तस्याथशब्दघटितत्वेऽपि सूत्रत्वाभावात्। तत्र हि – ‘ अथ यदसन्दिग्धमप्रयोजनञ्च न तत्प्रेक्षावत्प्रतिपित्सागोचरम् ’[20] इत्यादिना प्रवृत्तं व्याख्यानम्। अतोऽनाग्रहेण प्रमात्मकग्रहेण वचनस्यास्य विषये इदमेव वक्तव्यं भवति यदिदम् ‘ अथ शब्दानुशासनम् ’ इति न पाणिनिसूत्रम्, किन्तु महाभाष्यकारस्य पतञ्जलेरेवेदं प्रथमं वाक्यमिति।

अत्र भीमसेनशास्त्रिणा प्रदत्ता शङ्का समाहिता ‘ प्रत्याहार – सूत्रों का निर्माता कौन ? ’ इति नामके ग्रन्थे यथा – अथ शब्दानुशासनम् ’ इति वाक्यं पाणिनिसूत्रं स्यात्, तर्हि महाभाष्यकारस्तत्सूत्र-व्याख्यानं पाणिनिसूत्रव्याख्यासन्दर्भे कुर्यात्, किन्तु तथा तु न कृतम्। यतो हि पाणिनिसूत्रव्याख्यानं

[18] न्यायसूत्रम् – ( 1-1-1 )

[19] वात्स्यायनभाष्यम् – ( पृ. 1 )

[20] भामती – ब्रह्मसूत्रे – ( 1-1-1 )

तृतीयाह्निकतः प्रारब्धम् । मध्ये द्वितीयाह्निके माहेश्वसूत्राणां व्याख्या कृता । अस्य वचनस्य महाभाष्यकारीयत्वे तु न किमप्यनुपपन्नमिति चेन्न, ‘ अथ शब्दानुशासनम् ’ इति वाक्यं पाणिनेरेव इति मतं येन स्वीकृतम्, तेन प्रत्याहारसूत्राणि पाणिनिनिर्मितान्येव स्वीकृतानि । अत एव न तत्प्रमाणमिदं वाक्यं पतञ्जलेरिति ।

‘ अथ शब्दानुशासनम् ’ इति वचनं भगवतः पाणिनेः स्यात्, तदावश्यं भगवता तदनन्तरसूत्रेण द्वितीयेनानुशासनकर्मत्वेन प्रतिज्ञातस्य शब्दस्य लक्षणं लक्षितं स्यात् । एवञ्च येषां केषाञ्चिन्मतेन यदि ‘ अथ शब्दानुशासनम् ’ इति वचनं भगवतः पाणिनेरेवादिमं सूत्रमिति पक्षो वर्त्तते, तदा द्वितीयं सूत्रं स्यात् “ वृद्धिरादैच् ” इति । किन्तु नात्र भगवान् पाणिनिः प्रतिज्ञातस्य शब्दस्य लक्षणं कृतवानिति सूत्रकारीयपद्धतिहानप्रसङ्गः । सूत्रकाराणां च तथैव शैली विद्यते यत्ते प्रतिज्ञातवस्तुनो लक्षणं प्रतिज्ञासूत्रानन्तरमेव चक्रुः । यदा च वचनमिदं भाष्यकारस्येति पक्षः समाश्रीयते, तदा न कापि क्षतिरिति चेन्न, ऋषिप्रणीतेषु कतिपयेषु ग्रन्थेष्वेतस्माद् विपरीतमपि दरीदृश्यते । यथा –

**निदानसूत्रे –** ‘ अथातश्छन्दसां नियचं व्याख्यास्यामः ’ इति सूत्रेण ‘ छान्दस् ’ प्रतिज्ञाय भाष्यकारस्तदनन्तरसूत्रेणैव छान्दसो लक्षणं न कृतवान् ।

**संख्यातत्त्वसमासे –** ‘ अथातस्तत्त्वसमासः ’ इति सूत्रेण ‘ तत्त्वम् ’ इति प्रतिज्ञाय तदनन्तरमेव द्वितीयेन सूत्रेण किमपि तत्त्वस्य लक्षणं न कृतम् ।

**सांख्यदर्शने –** ‘ अथ त्रिविधदुःखाऽत्यन्तनिवृत्तिरत्यन्तपुरुषार्थः ’ ।

**सुश्रुते –** ‘ अथातो वेदोत्पत्तिनामाध्यायं व्याख्यास्यामः ’ इत्यादिष्वपि प्रतिज्ञानन्तरमेव द्वितीयेन सूत्रेण किमपि लक्षणं न कृतम् । तस्मात् पाणिनिना ‘ अथ शब्दानुशासनम् ’ इति वचनानन्तरं लक्षणं न कृतम्, तेन भाष्यकारस्य वचनमिदं न वक्तुं शक्यते ।

‘ अथ शब्दानुशासनम् ’ इति स्वग्रन्थस्य ‘ अथेत्ययम् ’ इत्यादिना स्वयमेव व्याख्यानं कुर्वन्ति भाष्यकारा इति कैयटाभिप्रायः । एतच्च नागेशभट्टैरप्यनुमन्यते । शब्दकौस्तुभे च ‘ व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयत् अथ शब्दानुशासनम् ’ इत्युक्तम् । अन्येषामपि वैयाकरणवृद्धानामत्रार्थे एव सम्मतिः । यदि च ‘ अथ शब्दानुशासनम् ’ इति वचनं भाष्यकारीयं नेत्यभिमन्येत तदा ‘ अथेत्ययम् ’ इत्यतो भाष्यारम्भः स्यात् । तत्रत्यस्याथशब्दस्येतिशब्दपरत्वेन स्वरूपमात्रार्थकत्वान्न मङ्गलार्थत्वमिति न्यूनता स्यात् । अतोऽपि भाष्यवचनमेवैतदिति निश्चीयते ।

मीमांसकबिरुदभाजा युधिष्ठरमहाशयेन संस्कृत-व्याकरणेतिहासे प्रोक्तम् – आदिशब्दो भाष्यकारस्य न सर्वादिबोधकः, अपि तु किञ्चित् परतोऽपि विद्यमाने मध्यगेऽप्यादिशब्दः प्रयुज्यते । एवमेवान्त्यशब्दो मध्यगशब्दश्चापि तस्य व्यभिचारी । तत्र निदर्शनं च “ भूवादयो धातवः ” इति सूत्रे भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते इति वार्तिकं तद्भाष्यं च । “ भूवादय धातवः ” इति सूत्रं हि नाद्यं नान्तिमं न वा मध्यगम्, प्रथमाध्यायस्य तृतीयपादादौ वर्तमानत्वात् । तत्रापि च वशब्दः मङ्गलार्थत्वेनोक्तस्तत्समर्थनश्च ‘ मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते ’ इत्यादिरीत्यैव कृतम् । तस्मात् तस्यादित्वं मध्यगत्वं वा भाष्यकारेणाभ्युपगतम् । तेनैव सिद्धमिदं यदादिशब्दो मध्यगशब्दो वा सर्वादिभूते सर्वमध्यगे वा प्रयुज्येतेति नैषो नियमः । ततश्च अथ शब्दानुशासनमित्यस्य सूत्रत्वाभ्युपगमेऽपि “ वृद्धिरादैच् ” इति वृद्धिशब्दस्य मङ्गलार्थता न विरुद्ध्यते । ‘ रक्षोहागमलघ्वसंदेहाः प्रयोजनम् ’ इत्यस्य वार्तिकत्वेऽपि च सिद्धे शब्दार्थसम्बन्धे इति सिद्धशब्दस्यापि मङ्गलार्थता युज्यते एव । तदिदमितिहासमीमांसकस्य वचनं बालानामप्युपहासाय भवेत् । ‘ सति हि परस्मिन् यस्मात् पूर्वो नास्ति स आदिः, सति च पूर्वस्मिन् यस्मात् परो नास्ति सोऽन्त्यः ’ इति स्वयमेव भाष्यकृताऽऽद्यन्तयोर्लक्षणं कृतम् । तच्च स्वकीयं लक्षणं स्वयमेव स न मन्यत इत्यहो तस्याप्तता समर्थिता । “ भूवादयो धातवः ” इति सूत्रेण संगृहीतः, ततश्च संग्राहके सूत्रे कृतं मङ्गलं धातुपाठस्यैव मङ्गलं संवृत्तमिति तदभिप्रायः । सम्भवेच्च मध्यगशब्दस्य व्यभिचारित्वमपि, आद्यन्तौ विहाय सर्वेऽपि मध्यगा वक्तुं शक्यन्ते । आद्यन्तशब्दौ तु व्यवहारे शास्त्रे च नियतौ न व्यतिक्रममर्हतः ।

“ वृद्धिरादैच् ” इति सूत्रे हि ‘ एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । ‘ माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्ति, आयुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा भवेयुरिति ’[21] इति स्पष्टमादिशब्दो भाष्यकृतोपात्तः । नैवम् “ भूवादयो धातवः ” इति सूत्रे आदिशब्दोपादानं दृश्यते । एवमेव सिद्धशब्दविषयेऽपि ‘ महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते ’ इत्यादिशब्दप्रयोगो दृश्यते । तस्मात् “ वृद्धिरादैच् ” इत्यतः प्राक् सूत्रकल्पना ‘ सिद्धे शब्दार्थसम्बन्धे ’ इत्यतः प्राग् वार्तिककल्पना च न कथमपि प्रमाणिकी भवितुमर्हति । यैर्ग्रन्थकृद्भिस्तथोल्लिखितं तद्भ्रमात्प्रमादाद्वेत्येव मन्तव्यं स्यात् । भाष्यकृतस्तुलनायां तेषां प्रामाण्याभावात् । अद्यावधि सर्वेषु पुस्तकेषु व्यवह्रियमाणेष्वध्यायाद्यङ्केषु प्राथम्यमेव “ वृद्धिरादैच् ” सूत्रस्य दृश्यते इति ‘ अथ शब्दानुशासनम् ’ इत्यस्य सूत्रत्वकल्पना सर्वप्रामाणिकविरुद्धेत्यास्तां तावत् । तस्माद् भाष्यकृतः किं स्वकीयं वाक्यं किं वार्तिककृतो वार्तिकमिति निर्णयो दुःशक एवापतितः । भाष्यकारशैलीमेवावधानेन परीक्ष्य कथंचिद् निर्णीयत एवाऽभियुक्तैः[22] ।

अनया रीत्या विमर्शने कृते सति प्रबलप्रमाणदृढतरयुक्तिविमर्शमूलकतर्कसमर्थिततया कैयट-दीक्षित-नागेशप्रभृतयो विद्वांसः प्राचीनाः साम्प्रतिकाश्च भाष्यतत्त्वविदः ‘ अथ शब्दानुशासनम् ’ इति वचनं पतञ्जलेरेव मन्यन्ते तथैव मतमत्र दृढप्रमाणत्वेन स्वीकार्यमिति । गुणदोषादिविषये ते एवात्र प्रमाणम् । अतोऽल्पमतिरयं जिज्ञासुर्विद्वद्भिर्युक्तायुक्तविषयेऽनुग्राह्य इत्यभ्यर्थनां विज्ञापयति विनीतः सविनयम् ।

---

[21] महाभाष्यम् – ( 1-1-1 )

[22] पाणिनिपरिशीलनम् – डॉ. गिरधरशर्मा चतुर्वेदः – पृ. 88